# AMRITA VIDYALAYAM
## ANNUAL EXAMINATION 2018 - '19

**Class : VII** **Marks : 80**
**Time : 2½ hrs**

# संस्कृतम्

निर्देशाः
अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
खण्डः क - अपठित अवबोधनम् - 5
खण्डः ख - रचनात्मक कार्यम् - 15
खण्डः ग - अनुप्रयुक्त व्याकरणम् - 25
खण्डः घ - पठित अवबोधनम् - 35

## खण्डः क - अपठित अवबोधनम्

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

गङ्गा देशस्य प्रमुखा नदी। गङ्गायाः अपरं नाम भागीरथी। एषा नदी हिमालयात् निर्गच्छति। एतस्याः नद्याः तीरे बहवः तीर्थाः मुनीनाम् आश्रमाः च सन्ति। हरिद्वारनगरं प्रसिद्धं तीर्थस्थानम् गंगानद्याः तटम् अलंकरोति। अत्र अनेके देवालयाः सन्ति। सायंकालस्य दृश्यं तु अत्र अनुपमम् एव। भक्ताः गंगादेवीं श्रद्धया पूजयन्ति, प्रज्वालितान् दीपान् च नद्याः जले प्रवाहयन्ति। यदा प्रज्वालिताः दीपाः जलेषु तरन्ति, तदा एवं प्रतीयते यत्, ताराणां समूहः आकाशात् अवतीर्य पृथिव्याम् आगतः। गंगानदी परमपावना नदी मन्यते।

**I. एकपदेन उत्तरयत।** 1

क. देशस्य प्रमुखा नदी का?

ख. भक्ताः कान् नद्याः जले प्रवाहयन्ति?

**II. पूर्णवाक्येन उत्तरयत।** 2

क. गङ्गायाः तीरे के सन्ति?

ख. यदा प्रज्वालिताः दीपाः नद्यां तरन्ति तदा किं प्रतीयते?

**III. भाषिककार्यम्** 2

क. अनेके देवालयाः अत्र विशेषणपदं किम्?

ख. तरन्ति इति क्रियापदस्य कर्तृपदं किम्?

ग. गद्यांशात् एकं अव्ययपदं चित्वा लिखत।

घ. एतस्याः नद्याः तीरे ...... अत्र एतस्याः इति पदं कस्यै प्रयुक्तम्?

## खण्ड ख – रचनात्मकं कार्यम्

2. **भवतः भ्राता रामः पठनं त्यक्त्वा खेलने संलग्नः। तं पठनार्थं प्रेरितं कुर्वता लिखितं पत्रं प्रदत्तैः पदैः पूरयत।** 5

(प्राप्तम्, उचितम्, अद्यत्वे, छात्रावासतः, मन्ये, अग्रजः, राम, आवश्यकम्, त्यक्त्वा, न्यूनाः)

(क) ----------

दिनाङ्कः ----------

प्रिय (ख) -----------

शुभाशीष।

ह्यः एव मात्रा लिखितं पत्रं (ग) ------- पठित्वा ज्ञातम् यत् (घ) --------- भवतः रुचिः पठने न अस्ति। भवान् पठनं (ङ) --------- खेलने रतः अस्ति, एतद् तु न (च) -------। अस्मात् कारणात् एव गत परीक्षायाम् भवतः अङ्काः (छ) -------- आसन्। यद्यपि खेलनम् अपि जीवनाय (ज) --------- परं पठनम् अपि तथा एव अनिवार्यम्। ये कालं व्यर्थं नयन्ति ते कदापि सफलतां न प्राप्नुवन्ति। (झ) ---------- त्वं मम कथनं मनसि धृत्वा पठने एव ध्यानं दास्यसि। मातृपितृभ्यां मे प्रणामाः।

भवतः (ञ) ----------

सोमेशः

3. **अधोलिखितं चित्रं दृष्ट्वा संस्कृतेन पञ्चवाक्यानि लिखत।** 5

(सूर्यः, उटजौ, तृणानि, नयति, डयन्ते, ग्रामस्य, हरितिमा, नदी, वृषभौ)



4. **मञ्जूषा सहायतया रिक्तस्थानानि पूरयित्वा अनुच्छेदपूर्तिं कुरुत।** 5

(पश्चात्, सूर्यः, नमः, सूर्यम्, जीवनम्, पञ्चवादने, पूजनम्, गायति, देवालयम्, स्नानम्)

पितामही

पितामही प्रातः (क) ---------- शयनात् उत्तिष्ठति। सा (ख) ----------- करोति। स्नानात् (ग) --------- सा देवस्य (घ) --------- करोति। सा भक्तिगीतम् (ङ) ---------। सा (च) -------- नमति। सा वदति सूर्याय (छ) --------। सा वदति-सूर्यः सकल-संसाराय (ज) --------- यच्छति। एतस्मात् कारणात् (झ) ------- पूजनीयः अस्ति। यदा-कदा सा (ञ) ------- गच्छति।

## खण्ड ग - अनुप्रयुक्त व्याकरणम्

**5. अधोलिखितेषु रेखाङ्कितेषु शब्देषु सन्धिं सन्धिविच्छेदं वा कुरुत।** **4**

क. उदारचरितानां तु वसुधैव कुटुम्बकम्।

ख. भाषेयम् अनेकासां भाषाणां जननी मता।

ग. शीघ्रं तमुपेत्य यथा + उचितम् करिष्यामः।

घ. अम्बुदमालाम् अम्बरभूषाम् आदाय + एव हि प्रतियाम।

**6. लकार परिवर्तनम् कुरुत।** **3**

क. युवां पाठं पठथः। (लोट् लकारे)

ख. अहं पठनाय विद्यालयं गच्छामि। (लङ् लकारे)

ग. तौ तत्रैव अतिष्ठताम्। (लृट् लकारे)

**7. उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत।** **4**

क. ------- परितः वनम् अस्ति। (ग्राम)

ख. ------- नमः। (शिव)

ग. ------- उपरि खगाः सन्ति। (वृक्ष)

घ. अम्बा -------- सह गच्छति। (पुत्र)

**8. रेखाङ्कितपदेषु प्रकृति प्रत्ययौ संयोज्य वा विभज्य वा लिखत।** **4**

क. गजः आगत्य वृक्षस्य शाखाम् शुण्डेन अत्रोटयत्।

ख. छात्राः विद्यालयं गत्वा पठन्ति।

ग. सर्वभूतेषु आत्मवत् व्यवहारं कर्तुम् संस्कृतभाषा सम्यक् शिक्षयति।

घ. सुतायाः प्रश्नान् श्रुत्वा पिता अवदत्।

**9. उचित संख्या पदेन रिक्तस्थानानि पूरयत।** **4**

क. कक्षायां --------- छात्राः पठन्ति। (54)

ख. छात्रावासे --------- जनाः सन्ति। (73)

ग. एकस्मिन् वर्षे -------- पक्षाः भवन्ति। (24)

घ. स्थालिकायां --------- मोदकानि आसन्। (62)

**10. उचित अव्ययपदं चित्वा लिखत।** **4**

(यत्र, ह्यः, शीघ्रं, शनैः, नीचैः)

क. जलं -------- वहति।

ख. शशकः -------- धावति।

ग. वृद्धः --------- चलति।

घ. ---------- अहं विदेशम् अगच्छम्।

**11. कोष्ठकदत्तस्य शब्दस्य उचितरूपं लिखत।** **2**

क. वने --------- भ्रमन्ति। (पशुः, पशवः)

ख. --------- दर्शनम् पुण्यम्। (साधुनाम्, साधूनाम्)

ग. सः --------- पुष्पमालाम् अर्पयति। (मुनेः, मुनये)

घ. छात्राः ----------- नमन्ति। (अध्यापिकाम्, अध्यापिकायै)

## खण्ड घ - पठित अवबोधनम्

**12. अधोलिखितं गद्यांशं पद्यांशं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

**अ. गद्यांशम्**

विश्वस्य उपलब्धासु भाषासु संस्कृतभाषा प्राचीनतमा भाषा अस्ति। भाषेयम् अनेकासां भाषाणां जननी मता। प्राचीनयोः ज्ञानविज्ञानयोः निधिः अस्यां सुरक्षितः। संस्कृतस्य महत्त्वविषये केनापि कथितम् - भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा। इयं भाषा अतीव वैज्ञानिकी। केचन कथयन्ति यत् संस्कृतमेव सङ्गणकस्य कृते सर्वोत्तमा भाषा।

**I. एकपदेन उत्तरयत।** **2**

क. संस्कृतभाषा कस्य जननी?

ख. संस्कृतं कस्य कृते सर्वोत्तमा भाषा?

**II. पूर्णवाक्येन उत्तरयत।** **2**

संस्कृतस्य महत्त्वविषये किं कथितम् ?

**III. भाषिककार्यम्।** **2**

क. 'कोषः' इति स्थाने किं प्रयुक्तम्?

ख. 'अनेकासां' इति पदस्य किं विशेष्यं पदं प्रयुक्तम्?

ग. 'नूतना' इति पदस्य विलोमपदं किं प्रयुक्तम्?

घ. 'अस्ति' इति क्रियापदस्य कर्तृपदं किम्?

**आ. पद्यांशम्**

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न हि धनं विद्या विहीनः पशुः ॥

**I. एकपदेन उत्तरयत।** **2**

क. विद्या नरस्य किम्?

ख. विद्या कीदृशं धनम्?

**II. पूर्णवाक्येन उत्तरयत।** **2**

विद्या किं किं करोति?

**III. भाषिककार्यम्।** **2**

क. परा देवता अत्र विशेषणपदं किम्?

ख. 'रहितः' इति अर्थे किं पदं प्रयुक्तम्?

ग. 'निन्दा' इति पदस्य विलोमपदं किं प्रयुक्तम्?

घ. 'पूज्यते' इति क्रियापदस्य कर्तृपदं किम्?

**इ. नाट्यांशम्**

पिता (विरक्तभावेन) - अनारिके! प्रस्तराणि जनाः पर्वतेभ्यः आनयन्ति।

अनारिका - पितः तर्हि किम्, एतदर्थं मन्त्री धनं ददाति? तस्य पार्श्वे धनानि कुतः आगच्छन्ति?

पिता (एतान् प्रश्नान् श्रुत्वा) - अरे! प्रजाः सर्वकाराय धनं प्रयच्छन्ति।

अनारिका (विस्मिता भूत्वा) - पितः! कर्मकराः पर्वतेभ्यः प्रस्तराणि नयन्ति। ते एव सेतुं निर्मान्ति। प्रजाः सर्वकाराय धनं ददति। तथापि सेतोः उद्घाटनार्थं मन्त्री किमर्थम् आगच्छति?

**I. एकपदेन उत्तरयत।** **2**

क. काः सर्वकाराय धनं प्रयच्छन्ति?

ख. के सेतुं निर्मान्ति?

**II. पूर्णवाक्येन उत्तरयत।** **2**

अनारिकायाः मनसि का जिज्ञासा?

**III. भाषिककार्यम्।** **2**

क. अनारिके! प्रस्तराणि जनाः पर्वतेभ्यः आनयन्ति इति वाक्ये कर्तृपदं किम्?

ख. 'आनयन्ति' इति पदस्य किं कर्मपदं प्रयुक्तम्?

ग. 'यच्छन्ति' इति पदस्य समानार्थकपदं किं प्रयुक्तम्?

घ. 'श्रुत्वा' इत्यत्र कः प्रत्ययः प्रयुक्तः?

**13. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **5**

क. <u>मनोविनोदाय</u> सा गृहात् बहिः अगच्छत्।

ख. <u>वरिष्ठान्</u> प्रति अस्माभिः प्रियं व्यवहर्तव्यम्।

ग. <u>प्रकृतिः</u> अपि सर्वेषु समत्वेन व्यवहरति।

घ. वयं <u>विमानयानं</u> रचयामः।

ङ. काष्ठकूटः <u>चञ्च्वा</u> गजस्य नयने स्फोटयिष्यति।

**14. निम्नलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत।** **4**

केयूराः न विभूषयन्ति पुरुषं हारा न चन्द्रोज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजा।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते

क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम्।।

(क्षीयन्ते, केयूराः, संस्कृता, मूर्धजाः स्नानं, पुरुषं, वाग्भूषणं, कुसुमं)

अन्वयः - पुरुषं न (क) -------- न चन्द्रोज्वलाः हाराः, न (ख) --------- न विलेपनं, न (ग) --------- अलङ्कृता (घ) --------- विभूषयन्ति। या एका (ङ) --------- पुरुषं वाणी धार्यते। सा एव (च) ------- समलङ्करोति। अखिलभूषणानि (छ) --------। सततं (ज) --------- भूषणम् अस्ति।।

**15. घटनाक्रमानुसारं लिखत।** **4**

क. कालेन तस्याः सन्ततिः जाता।

ख. एकदा प्रमत्तः गजः आगत्य तस्याः नीडं भुवि अत्रोटयत्।

ग. सा मक्षिका तान् स्वमित्रं मण्डूकस्य समीपे अनयत्।

घ. चटकायाः विलापं श्रुत्वा काष्ठकूटः तां वीणारवा नाम्न्याः मक्षिकायाः समीपम् अनयत्।

ङ. तथा चोक्तम् – बहूनामप्यसाराणां समवायो हि दुर्जयः।

च. तेन अण्डानि विशीर्णानि जातानि ।

छ. मेघनादः अवदत् – यथाहं करिष्यामि तथा कुरुतम्।

ज. एकस्मिन् वने एका चटका वसति स्म।

**16. अधोखितवाक्येषु रेखाङ्कितपदानां कृते उचितम् अर्थं चित्वा लिखत।** **4**

क. विद्यया अमृतम् अश्नुते। (पिबति, गच्छति, मिलति)

ख. गजः आगत्य चटकायाः नीडं भुवि अत्रोटयत्। (समयेन, उपेत्य, गत्वा)

ग. अधुना निखिले संसारे कलहस्य वातावरणम् अस्ति। (अशेषे, जगति, स्वच्छे)

घ. अनारिकायाः मनसि जिज्ञासा भवति। (खेदम्, चेतसि, औत्सुक्यम्)